(मानवसूत्र शुल्वसूत्र) टीका— cf. Cat. Cata. Vol. I - 1.451.

B.D. 86.

॥अथ सुल्बभाष्यस्वार्थपरोपकारार्थप्रारंभः॥

DR. BHAU DAJI LIBRARY
MUMBAI

सूव॰ ॥श्रीगणेशायनमः॥आहवनीयंयजमानमात्रदीर्घचतुरस्रंविहस्तावती भाष्य
रज्जुमभ्यस्यमध्येलक्षणंकृत्वादक्षिणयोःश्रोण्यंसयोरंतौनियम्यलक्षणेन
॥ १ ॥ दक्षिणानायन्यनिमित्तकारातिनिमित्तेरज्जुनियम्यांतौसमस्यदक्षिणायाःश्रोण
ईक्षिणमंसमनुलिखेदेवमेवोत्तरतस्तिर्यग्मामंहिगुणांतथाकृत्वापुरस्तात्स
श्चाच्चोपलिखेदिति॥दीर्घचतुरस्रस्यपूर्वंतयोराहवनीयगार्हपत्यःपरिमा
बा णप्रकारोंत॥अरत्नीश्चतुरस्रस्तुपूर्वस्याग्नेःखरस्मृतः॥रथचक्राकृतिःप
श्चाद्वेद्रार्द्धंदक्षिणः॥१॥मंउलेपरिलेखःस्याद्घवोनानिचतुर्दश॥परि ॥ १ ॥
लेखार्द्धंचंद्रेस्यात्सार्द्धंयेकोनविंशति॥२॥पूर्वस्येतिदीर्घचतुरस्रात्पूर्व

स्यआहवनीयस्येत्यर्थः॥खरोऽधिष्टानोपश्चादितिदीर्घचतुरस्रात्पश्चात्गा
र्हपत्यस्येत्यर्थः॥वेदीपश्चान्मध्येप्रदेशेशंकुंस्थापयित्वातत्रपाशंदत्वा॥यत्रो
नानिचतुर्दशांगुलानिमित्वाभ्रामयेनगार्हपत्यस्थानंसाधयेद्वेवंरथचक्राकृ
तिस्यादित्यर्थः॥परिलेखोर्द्धचंद्रेस्यादिति॥यत्रदक्षिणाग्निर्दक्षणंतत्रशं
कुंदत्वासार्द्धंकोनविंशतिअंगुलमितयारज्वाभ्रामणेनमंउलंविधायदक्षि
णार्द्धंस्थापयेदुत्तरार्द्धंलुपयेति॥एवंसतिचंद्रार्द्धंनाभवति॥सिकतानां +
खरंकुर्याद्मेरायतनंहितत्॥उद्धृत्यवोप्सनोत्कृत्यस्थंनकुर्वीतलक्षणं॥ ३
खरप्रमाणोरत्नारत्नीचिप्रथमाग्नेवेत्॥पंचप्राच्यस्तनोरत्नादक्षिणेचोत्तरे

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

चान्येतयोर्मध्येतुपंचमी॥रेखानामचतुर्वर्णदेवताःसंप्रकीर्तिताः॥८
शिव्यग्निश्चवायुश्चसोमश्चेद्रःप्रजापतिःलक्षणेतुहृतेतस्मिन्नग्नेःप्रण
यनंभवेत्॥विसृष्टार्थयतेःश्लोकाः॥दक्षिणाग्नेःसाधनस्योक्ततत्वेपि
केचनविशेषंसूचयितुंपुनरनुवदति॥अणीयस्याश्चतुर्स्रंरज्जुमि
त्रिधाभजेत्॥मध्यंचतुर्धासंभुज्यमध्यंलक्षणंभवेत्॥पूर्वंत्रिभा
गात्पश्चार्द्धेतुर्येदद्याच्चलक्षणमिति॥अणीयस्याइति॥अतिशयेनाणु
रित्यणीयसीतस्याःसर्ववेद्यपेक्षयाऽल्पीयस्याद्राशिक्याचेदिरिस्
र्थः॥तत्संबंधिनींरज्जुंचतुर्स्रांमितेत्यर्थः॥चतुरस्रामितिवदन्ता

भाष्य

॥ २ ॥

॥ २ ॥

गार्हपत्याहवनीयावंतरालिसत्रकुंडंमध्यशंकानिरस्तात्रिधाभजेदिति॥
तांरज्जुंत्रिधाकल्पयेत्॥भागत्रयंकुर्यादित्यर्थः॥मध्यंचतुर्धासंभुज्येति॥
मध्यंमध्यभागंचतुर्धासंभुज्यआचतुर्थंहृतस्यमध्यभागस्यरज्जोर्
यंलक्षणंभवेत्॥दद्यादित्यर्थः॥पूर्वंत्रिभागादिति॥अत्रत्यब्लोपेक
र्मण्यधिकरणेपंचमीवाच्येतिपंचमी॥ततश्चायमर्थः॥आसनात्
प्रेप्सतेआसनेउपवेशंप्रेप्सतइत्यर्थः॥इतीवसूर्वंतृतीयभागेलक्षणंद
ातेत्यर्थः॥पश्चार्द्धेइति॥त्रिभागेइत्यनुषज्यते॥पश्चार्द्धेतृतीयभागाव
धिभूतेरज्जौलक्षणंदद्यादित्यर्थः॥तुर्यंदद्याच्चलक्षणमिति॥एकस्मिन्

श्रौ चतुर्धाकृतभागेमध्यसंलक्षणंभवेद्दक्षेकंलक्षणंदापितंचऽपरंतुदक्षिणी भाष्य
यमध्यस्थेलक्षणंदद्याद्दक्षिणार्थः॥एवंचतुर्लक्षणायांशायद्दयवतीरज्जुः
" २ " संपन्नासाधनाप्रकारपूर्ववत्॥गार्हपत्यादवनीयावंतरेतिपरित्यज्यच
तुरस्रामितिवदतायत्रयावतिवेदिर्विहितातत्रतावतीरज्जुमित्वात्रिधाकृ
त्यनाहिकर्तव्यमितिसूचितं॥ततवरुणप्रघासपशौसोमाहोगार्हपत्यस्य
वेदिसामीप्याभावेपिद्व्यास्रेतृतीयभागउत्करःसूकरोभवतिइतिसू " २ "
चयितुं॥एतदेवचपूर्वाद्वैवेद्यावितृतीयमात्रेरस्रंपक्रम्यउत्तरतोले
खानामाग्नीध्रःप्रक्रममात्रउत्करेपाणिकोष्टकृत्वोपविशतीतिसूत्र्या

स्थानावसरे॥एतदेवमूलंतद्विपर्यस्योत्तरतउत्करायलक्षणमित्यस्य प
शौसोमेचपूर्ववित्तृतीयादितिव्याचख्युः॥कुमारस्यामितिपादः॥सौरा प्य
विहितावेदिःश्रुत्वेवितानसंमितेति॥सुशोभनारपिर्धनंयस्यासौसुरपिः॥
रपिरितिधननामरातेर्दानकर्मणइतियास्कःसुरपेःसुधनिनोभावःसौर
पसुधनित्वंअनुशानिकादानांचेत्यनुशतिकादित्वादुयपदवृद्धिः॥सौ
रार्ष्यायसुधनित्वायवेहितएतद्वाक्यरूपेसुधनित्वंभवतीत्यर्थः॥शेषंसु
गमं॥सौराष्ट्रेतिपाठोलेखकदोषात्रामादिकरस्रपेक्षणीयः॥दर्शपौर्ण
मासिकीवेदीर्दीर्घचतुरस्रं॥मित्वारस्रंचतत्रदार्हिक्षायजमानमात्रा

सूत्रं चतुरस्रायादीर्घचतुरस्रसाधनप्रकारमाह॥दार्शिकाषट्शायातुर्येससससद
दशैवतत्॥एकंह्यौपंचाशैर्मितासमरैःपरिलेखयेदिति॥दार्शिकीतिदर्शपौर्ण
मासवेहिसाधनीयभूतारज्जुःषट्शायाकार्येत्यर्थः॥तुर्येइतिदक्षचतुष्टयेल
क्षणेदेयमित्यर्थः॥तस्माच्चर्यैससससदशैवतदिति॥तदितिनस्मादित्यर्थेव्य
यं॥तथाचतत्तस्मात्चतुर्थलक्षणात्ससससदशामिलित्वाचतुर्विं
शंगुलानिमित्वाद्वितीयंलक्षणंदेयमित्यर्थः॥तच्चांसार्थि॥तदिसस्त्रोभयम
ध्यपादउभयत्राचयार्थः॥तस्माच्चपुनस्तत्तस्मात्तुर्यलक्षणात्एकंह्यैपंच
मीत्वाअष्टौअंगुलानिमित्वालक्षणंदेयमित्यर्थः॥तच्चाकर्षणार्थी॥समरैः

भाष्य

॥ ४ ॥

परिलेखयेदिति॥समरैरंसश्रोणिसंधिभिःपरिलेखयेदित्यर्थः॥एवंच
षट्शायेतियजमानसाक्ष्यःप्राच्याअर्द्धचनंभवति॥अष्टांगुलेलक्षणंदा
पेनवर्द्धितस्यषष्टांशाआकर्षणलक्षणंसूचितंचतुर्विंशांगुलेलक्षणदाने
नवर्द्धितस्यार्द्धप्रमाणेनांसार्द्धप्रमाणमितिसूचितं॥तथाचकात्तीयशुल्बं
प्रमाणार्द्धंवाभ्यस्याभ्यासषष्टेलक्षणमेतन्निरंचनमिति॥निरंचनमित्याक
र्षणलक्षणसंज्ञा॥एतदुक्तंभवति॥प्रकृतेयावतीप्राचीतदर्द्धंवर्द्धपयतु
रः॥वर्द्धितस्यांशाषट्केचप्राचीनःकर्षणार्थकः॥अंसार्थंवर्द्धितस्यात्
दीर्घचेदास्रिसंमतमिति॥प्रसंगात्समचतुरस्रसाधनप्रकारमाह॥पाशा

तृपाशस्तप्राच्यर्द्धेमध्येदद्याच्चलक्षणं॥मध्यातुरीयेनिरायामोविस्तारस्त्र भाष्य
र्द्धतोभवेदिति॥प्रक्रमेयावतीप्राचीविवक्षितासाऽर्द्धमध्येयथाभवतित
थापाशात्पूर्वस्मात्पाशाद्द्वितीयःपाशःकार्यःप्राच्यपेक्षयाद्विगुणा
ज्जुकार्यइत्यर्थः॥मध्येदद्याच्चलक्षणमिति॥वर्द्धितायावतीरज्जुर्जातातन्म
ध्येलक्षणंदद्याद्दित्यर्थः॥तत्रप्राच्यर्थे॥मध्येतुरीयेनिरायामइति॥मध्या
प्राचीलक्षणातुरीयेवर्द्धितस्यचतुर्थेशेनिरायामइतिनिर्गमायम्यतेऊ त
क्ष्यतेऽनेनेतिनिरायामः॥आकर्षणंतदर्थेलक्षणंदेयमित्यर्थः॥एवंच ॥ ५ ॥
समचतुरस्रंभवति॥सुधियाप्रकारांतरेणव्याख्येयं॥पूर्वदीर्घचतुर

स्रमंसश्रोण्योस्तुल्यप्रमाणमुक्तं॥मूलसूत्रेचाणीयसांपुरस्तादितिवदता
मनुनाश्रोण्योःप्रथीयस्त्वंसूचितं॥आपस्तंभश्चाखायाचपुरस्तादंशाय
सीप्रश्नात्प्रथीयसीतिकैतवोक्तं॥ब्राह्मणेचषट्त्रिंशत्प्रक्रमाःप्राचीच
तुर्विंशप्रक्रमेनत्रिरश्राज्जघनेनैतसपाद्श्रोण्योःप्रथीयस्त्वं॥उक्तंत
च्चसर्ववेद्याःश्रोणिप्रथीयस्त्वेमूलमिति॥प्रक्रमेऽसस्पादंप्रथीयस्त्वंसा
धयितुंपूर्वस्यामेवरज्वांप्राचीलक्षणात्प्रतीचीनंलक्षणंमाहे॥ ॥प्रा
च्यर्द्धेलक्षणंदद्याच्चतुर्भागेनिरंचनं॥ततोपरस्मिन्नंशेऽर्थेदद्यात्संच
कसप्तकेइति॥प्राच्यर्द्धइतिपूर्वोक्तदीर्घचतुरस्ररज्वाःदक्षिणेत्यादिना

लक्षितायाः प्राचीलक्षणादारभ्य पश्चिमभागे प्राच्यर्द्धहस्तद्वयेलक्षणंदद्या भाष्य
दित्यर्थः॥तद्यावधिज्ञानार्थं॥चतुर्भागेनिरंचनमिति॥चतुर्थोभागश्चतुर्भा
गइतिकोषट्टशयेस्फुटंक्रमात्रयचतुर्भागोयथाषडुभागोनास्त्रयोदशेति
॥तथाचप्राच्यर्द्धलक्षणादंगुलषट्कंनिरंचनमाकर्षणेलक्षणंदेयमित्यर्थः॥
नितरामच्यतेआकर्षतेऽनेनेतिनिरंचनमितिसंज्ञाअन्वर्थ॥यद्यपिदीर्घ
चतुरस्रेआकर्षणवर्द्धितस्यषष्ठेरोविहितंतत्राष्टांगुलेभवति॥नन्वेगुल
षट्केतथापिस्थूलमानादग्रेततोन्नयनेनसमर्चसंपत्तेर्नदोषः॥अनए
वाग्नेस्मार्त्तवेदीसाधनेपादोनचतुर्हस्तप्राचीकस्यदीर्घचतुरस्रायरज्जु

॥ ६ ॥

र्द्धाभ्यस्तासप्तार्द्धांगुलसार्द्धपंचहस्ताभवति॥तत्ररज्जुःशायार्धषष्ठांगुले
स्फुटोतदपिस्थूलमानेनेतिसमाधेयं॥एवमाकर्षणमपिसार्द्धहस्तेनोक्तं॥न
चयसार्द्धैर्गुलाधिकैनयुज्यतेतदपिस्थूलइतिनकश्चिद्विरोधइति॥तत्तस्मा
दाकर्षणलक्षणादपरस्मिन्श्रोणिश्रोत्यर्थेश्रोणिश्रोत्यर्थेपंचकसप्तकेमित्वाद्दद्या
ंगुलेलक्षणंदद्यादित्यर्थः॥एवंपूर्वपश्चात्भागेलक्षितारज्जुःअयासंविने
वश्रोणिसाधिकाभवति॥एवमंसात्सपादंश्रोणिअयायस्तेभवति॥पार्श्वमानी
श्रोणोप्रतिमुच्येस्फुन्नयनप्रकारेअवशिष्टप्रकारमाह॥ततोपरस्मिन्श्रोण
यैरज्जुश्चद्विगुणाभवेदिति॥ततउक्तप्रकारेणदीर्घचतुरस्रसाधनानंतरं

सुन्नयनेक्रियमाणेपरस्मिन्नंकार्थेआह्रस्यमानारज्जुद्विगुणाभवेदित्य भाष्य
र्थः॥चकारात्पूर्वंनंकार्थमाह्रस्यमाणाद्विगुणाभवेदित्यर्थः॥अनःपरं
मध्येसनंतामिति॥मूलसूत्रोक्तमवशिष्यते॥तत्रसनंताकरणप्रकारः॥
शुल्बकृतानरेक्तः॥तत्रायंतंबशुल्बेसनंतचकरणप्रकारः॥अपरेणाच
नीयंयजमानमात्रंदीर्घचतुरस्रंविहृत्यतावतीरज्जुमभ्यस्यमध्येलक्षणंद
त्वादक्षिणयोःश्रोण्यंसयोरंतौनियम्यलक्षणेनदक्षिणायायम्यानिमित्तंक
रोतिनिमित्तेरज्जुंनियम्यांतौसमस्यादक्षिणायाःश्रोणेर्दक्षिणमंससन्नुलिखे ॥ ७ ॥
देवमेवोत्तरतइतिअस्यार्थः॥तावतीरज्जुमभ्यस्येति॥तावतींयजमानमा

त्रीरज्जुमस्यद्विगुणांकृत्वेत्यर्थः॥मध्येलक्षणमिति॥तस्यचतुष्टयपरिमितेरज्जु
नेलक्षणंकर्तव्यमित्यर्थः॥दक्षिणयोःश्रोण्यंसयोरंतौनियम्येति॥दक्षिणश्रोणि
शंकादेशेतस्मिन्तायारज्वाःएकंपार्श्वंनिवेश्यदक्षिणांसशंकौचद्वयंपार्श्वंनि
वेश्येत्यर्थः॥लक्षणेनदक्षिणायायम्यनिमित्तंकरोतिइतिरज्जुमध्येयल
क्षणंकर्तंतेनगृहीतादक्षिणदिश्यातम्यमत्रलक्षणंक्षमायातिपत्रनिमित्तं
चिकंप्राक्कर्वादेयइत्यर्थः॥निमित्तेरज्जुंनियम्यातौसंमस्येतिनिमित्तेरज्जु
मध्यंगृहीत्वापार्श्वौनिक्षाप्यैकीकृत्यगृहीतेत्यर्थःदक्षि णायाःश्रोणेः
दक्षिणंमसमनुलिखेदितिदक्षिणायाःश्रोणेरारभ्यअनुलिखेत्यावदक्षि

णमसंएवंचमध्येसनंतनभवतिएवमेवोत्तरतइतिएवंप्रकारेणउत्तरश्रोणे भाष्य
रारभ्यात्तरंसर्पयंतमनुलिखेदितितथाचवेदेरुभयत्रोस 'मारभ्यश्रोणि
पर्यंधनुकृनाभवतिकातीयशुल्बरामवाजपेयभाष्येतत्रमध्यसंग्रहेपरिशि
ष्टेाआनायरज्जुपूर्वार्द्धात्पश्चार्द्धंयावदनुद्विगुणीकृत्यतांरज्जुंतत्रशंकुनि
खानयेत्तूवेदीश्रोण्यंसयोर्मध्येनयारज्वाष्टभाग्यायावाष्टथत्वतूरीयेण
विज्ञेयोमध्यसंग्रहइतिआनीयरज्जुमितिवेदेःपूर्वार्द्धात्प्राचीशंकासका
शात्अंससंकुवेष्टनेनश्रोणिशंकुवेष्टनेनचयावद्वेदेःपश्चाद्भागस्यम ॥ ८ ॥
ध्येभवतितावत्पर्यंतंरज्जुमानीयेत्यर्थः॥द्विगुणीकृत्यतांरज्जुमितितां

वत्यारज्वाअंतपाशाद्वयमेकीकृत्यप्राचीशंकौनिवेश्यरज्जुमध्यंगृहित्वांस
वेष्टनेनयत्रतद्रज्जुमध्यमायातितत्रशंकुनिक्षिपेत्यर्थः॥वेदीश्रोण्यंस
योर्मध्येतिवेदेःश्रोण्यंसयोर्मध्येयावतीरज्जुर्भवतितस्याःरज्वाअष्टधावि
भागंकृत्वाप्रथमेनभागेनपूर्ववदापितशंकोःसकाशाद्भागेनमंडलंकृ
त्वामंडलस्यदक्षिणार्धेलुंपेत्वेदीमध्यस्थमुत्तरार्द्धंस्थापयेन्मध्यसं
ग्रहोविज्ञेयइत्यर्थः॥वाष्टथत्वंतूरीयेणेतिपूर्वस्थापितशंकुस्थानेवेद्या
यावन्मात्रेष्टथुत्वंतस्यचतुर्थेनभागेनवापूर्ववन्मध्यसंग्रहोविज्ञेयेत्यर्थः॥
एवमुभयोःसन्नताकरणप्रकारयोर्मध्येयथायस्तेवापमुत्वस्यस्थशास्त्रा

नुसारित्वात्परिशिष्टांतरापेक्षयापरंभशुल्वोक्तस्यसन्नतीकरणस्याशक्यं भाष्य
युक्तंतथापिखंडमंडलयोश्चैवत्रिभागमवरोक्ष्यन्नितिस्मान्नवेदिनेशुल्बक्त
तावस्यमाणत्वात्॥खंडमंडलनाअर्द्धमंडलपरिशिष्टोक्तसंनतीकरणपक्षे
मवतीतितदेवाश्रवैयनीयमितितुप्रतिभाति॥मध्येशंकुंस्थाप्यसंग्रहः॥क्रि
यातेआनीयवेदेःपूर्वार्द्धोदितिमर्क्रमेणनक्रियतेमैत्रायणीयेर्यातिकैस्त
न्मूलंनबुध्यामहे॥मध्येसंनतामिति॥मूलस्यसर्वशाखासुसत्वात्तदादा
यमध्येसंग्रहः॥कस्यापिनस्यादिति॥माध्योदीनीयानांतुआनीयरज्जु ॥ ९ ॥
मितिदर्शितस्थलएवंसंग्रहकरणंदृश्यतइति॥षट्त्रिंशात्प्रक्रमाःप्राचीति

आत्मणोपदशिच्चतवेदेदीर्घचतुरस्त्रात्न्यासंविदानांआत्मणेविशेषरू
पेणानभिधानात्ततन्मूलंमत्वादीर्घचतुरस्त्रेनिसदार्शिकींदीर्घचतुर
स्त्रंसाधयित्वाषट्त्रायप्राचीकामाअपिपासुक्याःदीर्घचतुरस्त्रंविस्प
ष्टंयथाभवतितथात्॥नवत्रयापाश्वाभ्यामर्द्धतृतीययोर्लक्षणेहित्रयेअ
परस्मात्पूर्वस्माद्धर्द्धेषट्सुपाश्वंप्रतिमुच्यअपरस्माद्धर्तृतीये
गृहीत्वादक्षिणानिरायम्यदृयोःशंकुनिहन्यादेवमेवोत्तरतःपूर्वस्मा
द्धर्तृतीयेगृहीत्वादक्षिणानिरायम्यअध्यर्द्धंशंकुनिहन्यादेवमेवोत्त
रतःइति॥नवत्रयनि॥नवत्रयपरिमितापाश्वद्वयपरिमितारज्जुःकार्या

पाशाभ्यामर्धतृतीययोर्लक्षणमिति॥अर्द्धतृतीयोयद्योस्तावदर्द्धतृतीयौ॥ भाष्य
॥ १० ॥ सार्द्धौतस्तोतयोरित्यर्थः॥तथाचपूर्वस्मात्पाशात्सार्धहृयतस्तेएकंलक्ष
णंअपरस्माच्चपाशात्सार्द्धहृयतस्तेचैकंलक्षणंतेनतदुभयमपिअसं
श्रोणिसाधनआकर्षणार्थं॥द्विरायेअपरस्मादिति॥अपरस्मात्पा
श्चात्पाशाद्द्विरायेएकंलक्षणंतच्चश्रोण्यर्थं॥पूर्वस्माद्ध्यर्द्धइति॥पूर्व
स्मात्पाशात्सार्द्धहस्तेलक्षणंदेयमित्यर्थः॥तच्चसार्धं॥अपरस्मापा
शात्षट्रायेलक्षणंश्राच्यर्थंदेयमित्युपदेशः॥इतिकर्त्तव्यतामाह॥ ॥ १० ॥
षट्सुपाशंप्रतीच्येति॥षट्रायेलक्षणेशंकुंदत्वापाशैप्रविश्येत्यर्थः॥

अपरस्मादर्द्धतृतीयेगृहादक्षिणानिरायम्यहयोःशंकुंनिहन्यादित्यविस्प
ष्टार्थं॥एवमेवोत्तरतइति॥अपरस्मात्पाशात्सार्द्धहस्तादृयंगृहीत्वाउत्तरा
निरायम्यहस्तहयेशंकुंनिहन्यादित्यर्थः॥पूर्वस्मादर्द्धतृतीयंगृहीत्वादक्षि
णानिरायम्याध्यर्द्धंशंकुंनिहन्यादितिस्पष्टार्थं॥एवंमेवोत्तरतइति॥पूर्वस्मात्
पाशात्सार्द्धहृयंगृहीउत्तरस्यामाहृयसार्द्धहस्तेशंकुंनिहन्यादित्यर्थः॥
तथाचषट्रायांप्राचीचतुःरायांपश्चात्त्रिरायांपुरस्तादितिप्रमाणाव
रुणप्रघासीयोत्तराध्वर्युवदितुल्याभवति॥तथाचमूलसूत्रं॥वेदिंकरोति
यथोत्तरांवारुणप्रघासिकीमिति॥उत्तरांप्रतिप्रस्थातृवेद्यपेक्षयाउत्तरदिक्कं

स्त्रामित्यर्थः॥पूर्वार्द्धेवेद्यावित्तीयमात्रेऽरत्नीमात्रेचतुर्दिक्षुत्तरवेदि भाष्य
र्त्रिधातिइतिमूलसूत्रं॥दिक्षिःकोणइत्यर्थः॥तत्रारत्नीमात्रचतुरस्रसा
धनायपंचागीमाह॥द्विगुणेलक्षणंदद्याद्याद्येवचतुर्गुणे॥मूलाच्च
त्रिगुणेदद्यासंचागीप्रोच्यतेद्विसा॥परितनोतिद्वयैकाचद्विपाद्योत्तर
रवेदिकाति॥उत्तरवेदिकीतिउत्तरवेदिसंज्ञकाहवनीयस्त्रानसाधनी
भूतारज्जुरौत्तरवेदिकी॥द्वयैकाचेति॥एकःद्वयःप्रमाणंयस्याःसाद्वा
यैकाहस्तमात्री॥राजदंतदिषुपरमितिविशेषणाभ्तस्याप्येकशब्दस्यप ॥ ११ ॥
रतिपातः॥द्विगुणेलक्षणंदद्यादिति॥साहस्तमात्रीरज्जुर्द्विगुणाकार्यादिती

योहस्तोयस्मात्स्त्रानात्गुण्यतेनत्द्विगुणंहस्तमात्रंद्विगुणायस्मात्स्त्रा
नात्क्रियतेनत्रहस्तेलक्षणंदद्यादित्यर्थः॥सरद्याद्येवचतुर्गुणेति॥द्विगु
णातासतिचगुणाभवति॥चतुर्धागुण्यतेयस्मादितिचतुर्गुणंहस्तत्रयंत
याचचतुर्गुणायस्मात्स्त्रानात्हस्तत्रयपरिमितात्क्रियतेतच्चतुर्गुणं॥
तत्रत्रिहस्तेलक्षणंदेयमित्यर्थः॥मूलाच्चत्रिगुणेदद्यादिति॥मूलादारभ्य
त्रिगुणायस्मात्तभवतितत्त्रिगुणं॥तत्रहस्तत्रयेलक्षणंदेयं॥एवंचैक
हस्तासतीचतुर्हस्तालक्षयोपेताद्विपाद्यापंचागीप्रोच्यतेपंचानिसाध
नोपकरणानिलक्षणानियस्याःसापंचांगी॥अंगंगात्रंकटेभस्त्विष्यतइ

तितिपू॥परितनौति॥वेष्टयति॥ततश्च प्रथमपाशेशंकुंनिखायलक्षणत्र
येशंकुत्रयंदत्वावेष्टनेनदंडमात्रेचतुरस्रंभवतीतिसुगमोपायः॥व
क्ष्यमाणसद्दशिष्वुपयोग्यिनांप्रकारांतरेणपंचांगीमाह॥मध्येतुलक्ष
णंदद्याद्दुभयोश्चांतमध्ययोरिति॥मध्येयावदभिप्रेतपरिमाणकरज्जुम
ध्येएकंलक्षणंदद्यादित्यर्थः॥उभयोश्चांतमध्ययोरिति॥अंतयोर्भागयो
र्मध्येअंतमध्ययोरंतमध्ययोरित्यर्थः॥तत्ररज्जुमध्येलक्षणदानात्पू
र्वापरंभागद्वयंतन्मध्येएकैकंलक्षणंदेयमितिसूत्रार्थः॥एतल्लक्षणत्रयंपाशा
द्वयंपंचपंचांगीति॥एतदुपयोगः॥सदसूत्रव्याख्यानावसरेस्पष्टीकरिष्य

भाष्य

॥ १२ ॥

ते॥अतएववक्ष्यतिपरमतं॥यथाप्रदिष्टंपंचांगीहस्तेतिसंज्ञेपेणकरिकया
पुनरपिपाशुकीवेदिसाधनप्रकारमाह॥द्विश्रोणेऽर्द्धश्रोणेचतुर्थश्रोणेश्रोणार्द्धे
श्रोणएवच॥अर्धर्द्धश्रोणेनपातिताःपाशुकीवेदिरित्यतइति॥पूर्वस्मात्पाशा
दारभ्यद्विश्रोणलक्षणंतत्रोण्यर्थं॥अर्द्धश्रोणलक्षणं॥तत्रोणिसाधनेआ
कर्षणार्थं॥अर्द्धचतुर्थश्रोणेति॥अर्द्धश्चतुर्थोयस्यसोर्द्धचतुर्थः॥तस्मिन्
सार्द्धत्रयहस्तेलक्षणंतत्रप्राच्यर्थं॥श्रोणार्द्धेएतत्रोंसेसाध्यमानेआकर्षणा
र्थं॥श्रोणइतिगतोहस्तमात्रेलक्षणमितिसूत्रार्थः॥तत्रांसार्थं॥अर्धश्रोणेनपाति
तेतिताताद्ध्यर्द्धश्रोणेनपातिताःप्रांतपाशाः॥एतानिलक्षणानिअपउपाशादा

शुल्ब रभ्यक्रमेणपूर्वयाश्रयपर्यंतंबोध्यानि॥साधमैंनप्रकारःपूर्वोक्तइति॥९॥भाष्य॥
वंलक्षणलक्षितयानवश्रायरज्वायोसिकुरवेदिःसापाशुकीइत्युच्यत॥
॥१२॥ इत्यर्थः॥रज्जुव्यासपूर्वकंपशुवेदिसाधनप्रकारमाह॥पाशार्हुश्रये
भ्यःपंचनितोदाश्रयाश्चषट्प्राची॥त्रिश्रयेचभवेत्पाशःपाशुकीवेदि
रुच्यतइति॥यथोक्तलक्षणलक्षितायारज्वासिकुरवेदिपाशुकीऐंद्राग्नपशु
संबधिनीत्यर्थः॥पाशादिति॥पाशादारभ्यप्राचीषट्श्रयाप्राचीतियो
जनाषट्श्रयेप्राच्यर्थेलक्षणंद्रेयमित्यर्थः॥त्रिश्रयेचभवेत्पाशइति॥श ॥१२॥
ट्श्रयेप्राचीलक्षणाद्ग्नेत्रिश्रयेदस्तेत्रयेपाशोद्वितीयःस्यादित्यर्थः॥

एवंसतिनवश्रायारज्जुःसर्वत्रअर्हुश्रयेभ्यइतिबहुवचनात्त्रिषुअर्हुश्र
येषुक्रमात्त्रिणिलक्षणानिद्रेयानि॥तानिचअर्थात्प्राचीलक्षणाद्ग्नेर्बो
द्धव्यानि॥तथाचप्राचीलक्षणात्अर्हुदस्तेएकंतदाकर्षणार्थं॥ततश्चार्हु
दस्तेद्वितीयं॥तच्चश्रोण्यर्थं॥ततोर्हुदस्तेतृतीयं॥तच्चोसार्थं॥एवंसति
प्रथमपाशाविनारज्जुःपंचनितोदाभवतीत्यर्थः॥पंचनितोदाश्चीन्द्रानि
यस्याःसापंचनितोदाइति॥ननुअर्हुश्रयेभ्यइत्यस्यपाशादित्यनेनसह
पाठात्तेनैवान्वयोयुक्तोनचतुक्तप्राचीलक्षणोत्तरमितिचेत्र॥अग्निहोत्र
जुहोतियवागूंपचतीतिवत्पाठक्रमादर्थक्रमस्यबलीयस्त्वादिति॥अत्र

कल्येरज्जुव्यासः पूर्वकल्यद्वयेरज्जुव्यासंविनैववेदीरितिविवेकः ॥ ५ ॥
॥ अमुमेवार्थमार्ध्वदिनीयानामपिपरिशिष्टमाह ॥ नवास्त्रीमि ॥ तारज्जुलं
क्षितावट्स्यतः परं ॥ अर्हूअर्हूत्रिपाशाः स्यात्सप्तवेदिप्रसाधनीति ॥ त्रिगु
णायाःरज्जोःपाशंकृत्वापाशाद्धूर्हूनवशयंमित्वापाशुक्मुत्तरवद्विया
ख्यातति ॥ त्रिगुणायामिति ॥ ग्रंथस्तरिलत्वान्नव्याख्यातः ॥ सुधिभिर्व्याख्ये
यइति ॥ वारुणप्राघासिकंअध्वर्युप्रतिप्रस्थातृवेदिहूयंमारुतीवारुण्या
ख्यमेकयारज्वासाधयितुमाह ॥ वरुणप्रघाषूत्तरायाअर्हूप्रतिप्रस्थाताक ॥ १५ ॥
रोतितिर्यक्समांप्राचीमिति ॥ उत्तरायाःतिर्यगर्हूप्रतिप्रस्थानाकरोतिति

र्यक्समांप्राचीमिति ॥ उत्तरायामारुत्यारव्यायाअध्वर्युवेद्यांषट्शयेप्राची
कायाःचतुःशयप्रतीचिकामास्त्रिशयपुरस्तात्भंगीयायातिर्यगर्हूप्रती
चिशयद्वयंपुरस्तात्सार्हूशयंतावत्प्रथीयसींवेदिंकरोतिप्रतिप्रस्थाता ॥
समांप्राचीमिति ॥ षट्शयप्राचीकामित्यर्थः ॥ वरुणप्रघाइति ॥ दर्शपौर्णमा
सोइतिवत्कर्मनामधेयंअन्वर्थंच ॥ वरुणस्यप्रकर्षेणघासोऽदनंयेषु
तेवरुणप्रघासाः पुंस्त्वंलोकात्बहुबलंचकर्मणएकत्वेपिदर्शपौर्णमा
सोइतिविवचनवछाधुत्वार्थं ॥ उभयोर्वेद्योर्मारुतीवारुण्योयुगपदेकया
रज्वासाधनप्रकारमाह ॥ शयारज्वोर्विधानव्याषट्भागोनास्त्रयोदश ॥

सातीवारणीचैवसहावेदिसिमीषिता॥१॥पाशान्हूयोःशयेतस्मान्
हूयोरन्यतशये॥पूर्वात्पाशाद्ध्येर्द्धंततोन्यतादृङ्नयोः॥ततोध्य
र्द्धंतत्पादेकूलेमारुतीवारणी॥शयरज्जोरिति॥मारुतीवारणीच
वेदिसदृयकलसमुमिश्रितापुरुषेणरज्जोःशयोःत्रयोदशाकार्याः॥किं
लक्षणाःषडुभागोनाःअक्रांतत्वात्शयस्यषष्टोभागस्तुनोयेषांतेषडुभा
गोनाः॥तथाचचतुरंगुलोनत्रयोदशशयपरिमितारज्जुःकार्येत्यर्थः॥
पाशाद्धूयोरिति॥नावत्योरज्जोःप्रथमःपाशःकार्यः॥तस्मात्पाशाद्ध॥ १५ ॥
रभ्यहूयोःशयहूयेलक्षणमित्यर्थः॥तच्चाध्नुवेदेःश्रोणिश्रोक्त्यर्थं॥

शयेतस्माइति॥तस्माल्लक्षणात्शयेतस्मात्रेतच्चवेद्योरंतरार्थं॥हूयोरन्यदि
ति॥तस्माल्लक्षणाद्धूयोर्दक्षिणयोर्यदेकंलक्षणमित्यर्थः॥तच्चप्रतिप्रस्तरंवेद्याः
दक्षिणायाःश्रोणिप्रोतश्रोक्त्यर्थं॥आकर्षणार्थंततशयेरिति॥तसमाहस्तस्मात्
अग्नेशयेलक्षणंदेयंतच्चप्राच्यर्थं॥पूर्वात्पाशादिति॥पूर्वात्पाशादारभ्यअ
ध्यर्द्धंशयेअधिकमर्द्धंयस्यसअध्यर्द्धः॥तस्मिंसार्द्धहस्तेलक्षणंदेयमित्य
र्थः॥तच्चार्थमुत्तरवेद्याः॥ततोन्यत्पादान्नयोरिति॥ततसार्द्धहस्तात्
लक्षणात्पादोनेहस्तद्धयेअन्यत्लक्षणंदेयमित्यर्थः॥तच्चावेद्योरंसयो
रंतरालार्थंततोध्यर्द्धं॥तस्मादग्नेसार्द्धहस्तेलक्षणंदेयमित्यर्थः॥तच्चो

ससाध्यमानेआकर्षणार्थं॥एवंमारुतीवारुणीवेधोकृतेरचितेभवतःमारुती
ति॥ऊग्गायोसंज्ञाछंदसोबहुलमितिछंदसोरुत्वः॥रचनाप्रकारस्तूपूर्वंश्रो
कोरारभ्यषट्श्रायेद्वितीयः॥श्रोंकुरुताप्यःश्रोंक्रोःपाश्रोनिवेश्यपश्चिमा
त्सादारभ्यपंचमेतस्तिदत्तंयत्तृतीयंलक्षणंगृहीत्वादक्षिणतआकृष्य
लक्षणत्रयेश्रोंकुत्रयंदेयं॥एकैनोत्तरवेदेर्दक्षिणेश्रो――एवंपूर्वात्साश्रा
त्आरभ्यपंचमेतस्तेदत्तेचतुर्थेलक्षणेगृहीत्वादक्षिणआकृष्यअध्यर्द्धपा
देनद्वयेसार्द्धेश्रायेचश्रोंकुत्रयंदेयंतेनोत्तरवेद्याःदक्षिणांसअंतरालप्रति
प्रस्थातृवेदिदक्षिणांसप्रांतसिध्यति॥एवंवेदिद्वयंयुगपत्सिध्यंभवति॥

तथाचमूलसूत्रं॥अग्नेणाहवनीयंत्रिषुप्रक्रमेषपरितेवावकाश्रोष्टथिव्यां
श्रोंकुनितत्सवेदानप्रभृतिवेदिंविदधाति॥षट्श्रायांप्राचीचतुःश्रायांपश्चा
त्त्रिश्रायांपुरस्तात्पूर्वार्द्धेवेद्याविंतीयमात्रेअरत्नीमात्रीचतुर्हिंसिंतुत्तर
वेदिंविदधातीति॥अग्नेणेति॥अदूरतोग्नेरित्यग्नेणाएवमन्यतरस्यांअदूरेप
चम्याइतिष्टनप्रत्ययादग्नेणेतिसिद्धं॥स्वरादिचेनाव्ययत्वादव्ययादाप
सुपइतिसुपोलुक्॥आहवनीयस्येतिषष्ठीप्राह्मोएनयाद्वितीयेतिएन
६ पत्रस्ययांतयोगेवआहवनीयमित्येतिद्वितीयातथाचाहवनीयस्याहूरव
त्यग्नेरित्यग्नेणाहवनीयंएतच्चापूरत्वमनिप्रसक्तेतन्निरासायाह॥त्रिप्र

क्रमेष्विति॥अपरिमितेवाचकश्चरिति॥अपरिमितेप्रक्रमत्रयावधिकप्रदे
शेइत्यर्थः॥तथाचकात्यायनशुल्बे॥अरिमितंप्रमाणंदूयरितितद्यावधिक्यो
॥ १७ ॥ वधिरस्यवहिर्लात्प्रक्रमत्रयमेवप्राप्यते॥दृष्ठांशंकुर्निहन्येति॥वेदेप्रांता
वधिःदृष्टांतत्रशंकुर्निहन्येत्यर्थः॥शेषंसुगमं॥पुनरपिमूलसूत्रे॥प्रति
प्रस्थानादक्षिणांवेदिंकरोत्योत्तरस्मात्परिग्रहाद्रत्निमात्रंमंतरासमे
प्राचीभवतोयथाहवीषिसंभवेयुस्तथातिरश्चेकउत्करइतितिरस्मात्प
रिग्रहादिनिउत्तरपरिग्रहात्उत्तरपर्यंतमित्यर्थः॥अरत्निमात्रमंत ॥ १७ ॥
रेतिवेघोरत्निमात्रमंतरालंकार्यमित्यर्थः॥समेप्राचीभवतइतितुल्यपरि

माणेषट्त्रायपरिमाणप्राचीसूत्रेभवतइत्यर्थः॥एकउत्करइतिउभयोर्वेद्यो
रेकएवउत्करइतिसूत्रार्थः॥उत्करसाधनप्रकारस्तु॥आणयस्याश्चतुरस्रामि
ति॥व्याख्यानावसरेउक्तपित्र्येष्टीवेदिसाधनप्रकारमाह॥पुरुषेस्यान्निरा
यामःप्राच्यर्द्धषष्ठवर्जितःसषष्ठार्द्धोऽसःस्याद्विकुष्टापेत्रकीस्मृतेती॥
पुरुषस्यामिति॥अस्यांपित्र्येष्टिवेदिसाधनाख्तायांरज्जौ॥पुरुषेहस्तच
तुष्टयेपुरुषप्रमाणंचोदुंबपरिधास्सस्येत्यादिनात्रायचतुष्टयंवक्ष्यति॥नि
त्रायामोनिस्तरामायम्यतेआहन्यतइतिनिरायामः॥आकर्षणंतदर्थं
कुष्टांशंकुर्यच्चलक्षणंदेयमित्यर्थः॥प्राच्यर्द्धषष्ठवर्जितइति॥अर्द्धःषष्ठो

वर्जितोयस्मिन्निति अर्द्धषष्ठवर्जितः सार्द्धपंचहस्तः तस्मिन्प्राचीप्राच्यर्थलक्ष्म
णमित्यर्थः ॥ ततः षष्ठार्द्धोऽसः स्यादिति ततः सार्द्धपंचमेदस्तालक्षणा
त्सषष्ठार्द्धइतिषष्ठस्यार्द्धं षष्ठार्द्धं तेन सहेति सषष्ठार्द्धः एवंविधोसः दस्तार्द्ध
यं ॥ अंसत्रार्द्धेन तदूनाहित्यसंख्यालक्ष्म ॥ ते ॥ तेनार्द्धहस्तसहितोसोदस्त
द्वयंसार्द्धहस्तद्वयंतत्रपाशः कार्यः एवंसतिअष्टहस्तारज्जुर्भवति ॥ सा
र्द्धपंचहस्तेप्राचीशंकुंनिखायउभयोः शंक्वोः पाशौनिवेश्यचतुर्थंदृ
ष्टीत्वाआहत्यदक्षिणोत्तरयोः शंकूनिहन्यादेवंदिक्कुष्ठापेक्षकीभव
ति ॥ दिक्कुष्ठंकोणायस्याः सादिक्कुष्ठापेक्षणमियंपेक्षकीति ॥ कुष्ठंर

येगविशेषस्यात् कुष्ठाकोणेपिकथ्यतेरूढ्यभिधानात् ॥ तथाचमूलसूत्रेषु
रुषमात्रीचतुरस्रांदिक्कुष्ठंवेदिंकरोतीति ॥ एवौतदुक्तंभवति ॥ अष्टहस्त
मितारज्जुर्मध्येसार्द्धशयेततः ॥ ततः सार्द्धद्वयपाशोदिक्कुष्ठापेक्षकीस्म
तेति ॥ पाशादर्द्धशयेश्रोणिद्वयोः दृष्ट्वापरार्द्धयोः प्राच्यर्द्धस्ततोध्यर्द्ध
निरंचनं ॥ अर्द्धशयःर्द्धएवान्यत्ततोध्यर्द्धसउत्तरः ॥ ततस्तूरायिकः पाशः
खरज्वेद्योर्विधिः स्मृतइति ॥ ग्रंथस्यत्रटितत्वात्व्याख्यानमुपेक्षीतं ॥ सु
धिभिः कर्त्तव्यमिति ॥ ७ ॥ अथस्मार्त्तवेदिसाधनप्रकारमाह ॥ रज्जुः
शयार्द्धषष्ठांगुलातनुयाज्ञिकी ॥ चतुर्षुषडंगुलोनेषुसार्द्धेचशयेस

पादेन्यत्॥षडंगुलानाश्चतुरः प्राचीपश्चात्त्रयत्रयात्॥पूर्वार्द्धेर्द्धेत्र
तीयात्सावेदिपाकयज्ञिकीति॥रज्जुरित्यादि॥ननुनात्तिस्थूला॥यज्ञि
कीयस्तीयकुशमुंजादित्रिगुणनिर्मितानुश्चासौयज्ञिकीचेतिविशेषणस
मासइतिभट्टाश्चवक्रवेदः॥अथवालघियांसश्चेतियज्ञाश्चतनुयज्ञापा
कयज्ञास्तेषामियंतनुयज्ञिकीतिपाकयज्ञवेदिसाधनीभूतेत्यर्थः॥अतएवा
येकुशमुंजादिनिर्मितरज्जुस्वरूपस्यवक्ष्यमाणत्वात्तेनपौनरुक्त्यमिति॥बो ॥१९॥
ध्यं॥त्रयार्द्धेति॥त्रयःअर्द्धषष्ठोयस्याःसात्रयार्द्धपंचदशासांगुलाद
कांगुलाधिकसार्द्धपंचदशारज्जुःकार्येत्यर्थः॥चतुर्षुषडंगुलेनेषु

पादेनदशेचतुष्टयेप्रथमपाशात्तुल्यंतच्चप्राच्यर्थे॥पुनःपाशात्सार्द्धत्रयेल
क्षणमित्यर्थः॥तच्चाकर्षणार्थंश्रोण्यर्थंच॥सपादेऽन्यदिति॥पुनःपाशात्सपादे
दशेऽन्यद्धयमित्यर्थः॥तच्चोंसार्थं॥एवंसतिफलितमाह॥षडंगुलोनाइति॥ष
डंगुलोनदशचतुष्टयप्रमाणाप्राच्यांभवति॥पश्चार्द्धत्रयेति॥त्रयानोत्रयंय
स्यासापश्चाद्भागेभवति॥पूर्वार्द्धेअर्द्धतृतीयास्यादिति॥अर्द्धतृतीयस्याःसासा
र्द्धदशद्धयापूर्वभागेभवति॥अर्द्धशब्दोऽत्रभागवचनः॥सावेदिपाकयज्ञि
कीति॥पाकयज्ञसंबंधिनीत्यर्थः॥होमीयद्रव्याहुतिसंख्याबद्धोनुउच्यते॥
स्मार्त्तग्रंथेउक्तासाचस्मार्त्तवेदि॥बद्धावेदोपपद्यतेतिवेदिरद्धिमाह॥५॥हि

गुणा शतसाहस्रेकोध्यो पंचगुणा भवेदिति ॥ शतगुणितं सहस्रं लक्षं सतोमसं
स्थायस्मिन्कर्मणि सा विंशत्रिंशता दो तत्शतसाहस्रं तस्मिन्हि गुणा पूर्वोक्तमा
॥ २० ॥ नोपेक्षयामानेनहि गुणं तथाच्युल्लाधिकैकादशशायरज्जुः सार्द्धसप्तके
प्राची ॥ षट्शायापश्चात्पंचशायाउरस्तादिति ॥ पूर्वोक्तप्रकारेणकर्त्तव्या ॥ सा
चपूर्वोक्तक्षेत्रमाणापेक्षयाक्षेत्रफलंतश्चतुर्गुणक्षेत्रफलंभवति ॥ तत्सतोम
कुंडस्यक्षेत्रफलंतश्चातुर्गुण्येचविधानात्तश्चातुर्गुण्येनवेदेरपिचातुर्गु
ण्यंदर्शितं ॥ कोघांपंचगुणा भवेदिति ॥ कोटितोमेपूर्वोक्तवेदिमानापेक्षया
पंचगुण्येनवेदीकार्या ॥ तथाचसार्द्धसप्तविंशतिपंचांगुलाधिकारज्जुक

॥ २० ॥

लापंचदशशायापश्चात्पादोनैकोनविंशतिशायाप्राचीसार्द्धद्वादशशायापूर
स्तात्तथाभवतितथाकार्या ॥ एतच्चस्थूलतोमद्रव्यविधेयेबोध्यं ॥ सूक्ष्ममा
नंचक्षेत्रफलगणक्रमेणस्वयमुहनीयं ॥ वेदिसिद्धौ तन्मध्येतन्मध्येकुंडस्य
मानंस्थानंचाह ॥ खंडमंडलयोश्चैवत्रिभागमवशेषयन्धिष्ण्यंतत्रप्रकुर्वी
तयवोनानिचतुर्दशेति ॥ खंडशब्देनावधिरुच्यतइति ॥ भद्दाष्टावक्रः ॥ तथा
चखंडश्चमंडलंचतयोर्मध्येऽन्तरालेतृतीयंभागमवशेषयन्तत्रस्मार्त्तवेद्यो
धिष्ण्यंकुर्वीत ॥ तथाचाघर्द्वारंकुंडनिखायभ्रामणेनमंडलंकार्यमित्यर्थः ॥
एवंसतिपुरस्तात्पश्चाच्चतृतीयभागोवेदेरवशिष्यते ॥ किमानंधिष्ण्य

मतमाऽऽह ॥यवेनानिचतुर्हस्तेति॥यवेनानिचतुर्हस्तांगुलानिमिलाभ्रा
मणेनमंउलंकार्यमित्यर्थः॥लक्षहोमेत्वेहिद्वेगुण्यमुक्तंच॥कुंउस्यद्विगुणीकर
णप्रकारमाह॥अपिवासत्र्यंगुलंशरायंमितासर्वतःपरिलेखयेदिति॥अपिचे
तिलक्षहोमेअंगुलसहितंहस्तंमिलातावताव्यासार्द्धेनभ्रामयित्वामंउलंकुर्या
दित्यर्थः॥एवंचयवेनचतुर्हस्तांगुलव्यानिर्द्धेनभ्रामितान्मंउलाच्चतुर्गुणस्ये
त्रफलकंएतदपिमंउलंभवति॥कक्षहोमेचतुर्गुणमिलक्तंहिति॥कोटिहोमे
स्थूलहोमांचतुर्गुण्येन॥सूक्ष्महोमेक्षेत्रफलंतदाऽऽगुण्येनकुंउमानंस्यय
मूहनीयं॥द्विगुणंतुपुनर्मध्येउलकरंचतुर्गुणंकुर्यादौपासनीयस्यपाकपत्र

॥ २२ ॥

॥ २३ ॥

माष

रंविधिषुच॥वेद्यादिखननार्थंप्रसंगात्कांष्टकुण्डालक्षणप्रमाणमाह॥लचो
विलाद्दामयंमूलतोऽग्रिमयूखकं॥स्यात्तिर्यगीषामात्रोमयूखःप्रादेशमा
त्रोवेति॥दारुमयंकुद्दामयंवकुद्दालकंकार्यंतच्चोभागेबिलंयस्यतत्तच्चोबिलं॥
बिलंचत्रिरेखाप्रवेशनायगर्तः॥मूलतोऽग्रिमयूखकमिति॥अग्रेरिवमयूखो
ऽग्रंयस्येत्यग्रिमयूखकं॥अग्रिर्यथातिस्ण्याग्रातद्वेदमपितीस्ण्याग्रमित्यर्थः॥
तनूमयूखःकिंप्रमाणकःकार्यइत्यतआह॥स्यात्तिर्यगीति॥तिर्यक्पाइषाकु
द्दालिलेग्रोतंतिर्यक्काष्ठंतन्मात्रोमयूखःस्यात्॥अथवाप्रादेशमात्रोमयू
खोऽग्रंकार्यमित्यर्थः॥एवंचभाषयाहिसुतुल्यं तं॥रंकुंनिहन्यादिसुक्तंत

त्रशंकुमानमाह॥राजवःशंकवःकार्याःखादिरावेणवापिच॥द्वादशांगुलपर्यं
ताश्चांगुलंपरिमाणजाःद्वादशांगुलदीर्घाःपरिमाणतताःविस्तृतइत्यर्थः॥
॥ २२॥ शेषंसुगमं॥यूपावटप्रमाणंस्थानेचाह॥यूपमूलेरज्जुंपरिदृश्यचतुर्हस्तं
मुज्यरज्जुंप्रतिमुच्यसर्वतोनुलिखेदिति॥यूपमूलोपरिरज्जुंवेष्टयित्वेत्य
र्थः॥सारज्जुर्यावतिभवेत्तावतीचतुर्हस्तंभुज्यचतुर्हस्तंवक्ष्यमाणंकृत्वे
त्यर्थः॥ललाटंप्रतिमुच्येति॥ललाटंललाटंवेद्यालललाटमित्राचीसूत्रंप्रांत
शंकुस्तत्रशंकोश्चतुर्हस्तंतंरज्जुमुत्कासर्वतोनुलिखेत्॥तावत्यारज्जा ॥ २३॥
मंडलमानयेदित्यर्थः॥यूपावटस्याधिकखननेनोपरस्यावि॒कर्त्तव्यदु

परस्यावियुक्तेघास्यात्प्रयुक्तोयजमा॒नरज्जासणेदोषश्रवणात्तन्मानमुक्तं॥
एवंसतियूपावटस्यहुमंतर्वेदिआहवनीयेवेदिर्भवति॥अथसोमप्रभृतिर्वेदी
नांप्राग्वंशेप्रक्रमेणगणणात्॥प्रक्रमस्यचपदमानाधीज्ञानाधीचज्ञानत्वा
प्रथमंपदमानमाह॥पदंपंचदशांगुलंयावत्पदंवेति॥पदशब्देनपंचदशां
गुलानियाह्याणीत्यर्थः॥यावत्पदंवेति॥यस्ययावत्पदंतस्यतावदेवप्रमा
णंग्राह्यं॥ऐच्छिकोविकल्पः॥त्रयःचतुर्विंशत्यंगुलःप्रोक्तःपंचविंशत्यंगुलो
वाप्रादेशोद्वादशांगुलइतिनिगदव्याख्यानं॥त्रयःप्रादेशाःत्रयारत्नाइ
त्यातव्याइत्येवमादयउक्ताः॥यत्रिंशांगुलंचतुःत्रायस्त्रिंशत्यमाणा

स्याद्दारुकारस्यौदुम्बरीभाजनमिति॥अध्वर्योः परिमान्यधिकारदारुकारस्यैकेयज
मानस्यवा॥स्यामित्याहुः॥यत्रकुत्रचित्तरुस्वित्तस्यंगुलादिप्रमाणान्या
यतेतानिअध्वर्योरेवाग्राह्याणीत्यर्थः॥तत्रहेतुमात्॥अधिकारादिति॥
अधिकारतुल्यत्वादित्यर्थः॥यथाअग्नीद्दोध्वर्युःइतिसूत्रादिव॥अयमा
शयः॥आश्वास्त्रसमाप्तेर्विशेषविधिर्विनायद्वीतथतेसअधिकारः॥तथा
चविशेषतःकर्त्रभिधानेअध्वरेवयुक्तत्वेनोपदिष्टेतथारुस्तादीनां
विशेषतःसंबध्यनभिधानेसंबंधत्वेनाध्वर्युरेवोपविष्टेइति॥दारुकारस्ये ॥ २२ ॥
केति॥दारुकारःसूत्रकारःयजमानस्यवास्यामित्याहुः॥वाशब्दःपूर्वपक्ष

व्याहत्यर्थः॥तथाचकात्यायनः॥दानवाचनाच्चारंभणवरणंव्रतप्रमाणेषुयजमा
नंप्रतियादिति॥सोमप्रभृति॥वेद्यांप्रक्रमेणव्यवहारात्प्रक्रमप्रमाणमात्॥द्विप
दंप्रक्रमस्त्रिपदोऽहुंत्रिपदोवापंचपदस्त्वेवसाग्निकइति॥यथेष्टमानेनद्वेपदेप्र
माणंयस्यसद्विपदःत्रिणिपादानिप्रमाणंयस्यसत्रिपदः॥अहुंतृतीयंपदंप्रमा
णंयस्यसोऽहुंत्रिपदः॥संख्याशब्दानांवृत्तिविषयेपूरणार्थत्वंत्रिभागशेषासु
निशास्त्विितिवदतिकैय्यटः॥अत्रसोमसूत्रभाष्यकारः॥द्विपदप्रक्रमस्त्रिपदोपदो
ऽहुंत्रिपदोवेतिप्रक्रमविकल्पायथाक्रममिष्टिपशुसोमेषुकार्यइस्यात्॥तत्रएवं
सतिइष्टिकेद्विपदःप्रक्रमःपशुकेत्रिपदःसोमेऽहुंत्रिपादःस्यात्॥तत्रयुज्यतेउ

सोमेत्रिपदोऽग्नेस्त्रिपदोवितिपक्षद्वयंतत्राद्यकारावकाशात्ऐच्छिकोविकल्पः॥२

सुल्व ॥२६॥ त्तरोत्तरंचद्वैरेवयुक्तंचातआहुस्त्रिपदोचेति॥विकल्यस्यक्रमार्थतायांसिद्धेश्च॥त भाष्य
याचप्राक्सौमिकेद्विपदोविकल्पेः॥शाखांतरेपि॥प्राक्सौमिकसोमयोर्विषयेएव
प्रक्रमविभजनात्॥तथाचमाध्यंदीनीयानांपरिशिष्टं॥आधानेयदिकंकुर्या
त्सोमेतुद्विपदोभवेत्॥अग्नौतुत्रिपदंकुर्यात्प्रक्रमंयाज्ञिकोबुधइति॥तथाचा
पस्तंभसुल्वे॥प्रक्रमोद्विपदस्त्रिपदोवसि॥प्राक्सौमिकसोमयोर्वाशब्देनव्यवस्थे
त्यर्थः॥तस्मात्सोमेत्रिपदोवेतिव्यवस्थितिकोविकल्पः॥इतियुक्तेउत्तरयाप्रः॥
पंचपदस्तेतसाग्निशब्देनाग्न्याधिकरणिभूताचितिर्लक्ष्यते॥तथाचसमयनि॥ ॥२४॥
कक्रतौपंचपदएवप्रक्रमोग्राह्यइत्यर्थः॥एवकारेणन्यूनताव्यवच्छेदः॥ ५॥

॥श्रीमोढमैत्रमहश्रीनारदसूनुशंकरकृतेमैत्रायणीयसुल्वभाष्येप्रथमःख
उः॥ ५ ॥दृष्ट्याशंकोपाशंप्रतिमुच्यप्राचीमायम्यपंचदशसुलक्षणंतत
स्त्रिकत्रिकंविशत्यालतस्त्रिषुततोद्वादशसुपाशंकरोति॥तत्षट्त्रिंशेप्रतिमु
च्यापरस्मात्ततःपंचदशसुरज्जीलादक्षिणानिरायम्यपंचदशसुशंकुनि
हन्यादेवमेवोत्तरतः॥पूर्वस्मात्पंचदशसुरज्जीलादक्षिणानिरायम्यद्वाद
शसुशंकुनिहन्यादेवमेवोत्तरतः॥परिलखतीति॥वक्ष्यमाणमानमार्गेण
प्राचींसाधयित्वायादपेक्षितमोनेनप्राचीसूत्रोपरिरेखांविलिखनदेखाप
रिज्ञार्थंतदुपरिस्फुटतरोमार्त्तवःपालिकाकारःपरिधिक्रियतेसाहश्यस्फ

च्यते॥षट्त्रिंशाक्षरविति॥वक्ष्यमाणप्राग्वंशसंज्ञकान्मंडूपानत्रिप्रक्रमेष्वूर्ध्वं
क्तायांषट्त्रिंशानिक्षिपेत्तंकोपरांप्रतिमुच्येत्यर्थः॥तथाचमूलसूत्रं॥अग्रेणप्रा
ग्वंशंत्रिषुप्रक्रमेषपरिमिनेवावकाशेषट्त्रिंशाक्षंकुनिहन्यावेदांतनप्रभृति
वेहिविदध्यातिरिति॥प्राचीमायम्येति॥तंरज्जुंप्राचींप्रसार्यपंचदशसुप्रक्र
मेषुलक्षणंदद्यादित्यर्थः॥एतत्सूत्रात्पूर्वमव्यवधानेनप्रक्रमस्योक्तत्वात्
तेनैवव्यवहारोबोध्यः॥सच्चलक्षणमाकर्षणार्थंश्रोणिशंकुर्थंच॥ततस्ते
कविंशत्यामितिततःपंचदशसुलक्षणादनंतरमेकविंशत्याप्रक्रमेषुअपरं ॥ २५ ॥
लक्षणंकार्यमित्यर्थः॥पंचदशैकविंशमिलितषट्त्रिंशत्पद्यांततस्तच्चल

क्षणं प्राच्यर्थं॥अतःपरंससाधनार्थंलक्षान्याह॥ततस्त्रिधीति॥ततःप्राचील
क्षणोत्तृतीयेषुप्रक्रमेषेकंलक्षणमित्यर्थः॥तच्चोसेसाध्यमानेआकर्षार्थं॥ततस्त्रिधि
ति॥त्रिषुलक्षणात्पुनस्त्रिषुप्रक्रमेषुलक्षणं॥तच्चोसार्थं॥ततोद्वादशसुपाशं
करोतीति॥निगदव्याख्यानं॥पंचरज्जुंलक्षयित्वाइतिकर्त्तव्यतामाह॥ततष्ष
ट्त्रिंशेप्रतिमुच्येति॥तत्तस्यार्थेतदित्यव्ययं॥तथाचतंद्वितीयंपाशंषट्त्रिंशे
न्प्रक्रमेषुप्राचीशंकुनिखायतत्रप्रतिमुच्येत्यर्थः॥अपरस्मात्ततःपंचदशसु
ष्टतीत्वेति॥अपरस्मात्ततपाशादित्यर्थः॥पंचदशसुयल्लक्षणंदत्तंतत्रष्टतीत्वा
दक्षिणस्यांदिशिंहरूपंतत्रैवशंकुंनिहन्यादित्यर्थः॥एवमेवोत्तरंतरति॥चतु

॥ २५ ॥

धाव्याख्यातं॥पूर्वस्मादिति॥पूर्वस्मात्पाशात्पंचदशसुगतीत्वाद्दक्षिणस्या
माक्षस्यहादशसुप्रक्रमेषुयत्प्रक्षणंतत्रशंकुंनिहन्यादित्यर्थः॥एवमेवोत्तरत
इतिस्फुटं॥परितस्तनोतीति॥असंश्रोणिवेष्टनेरेखांकरोतीत्यर्थः॥एवंचप्रा
चीषट्त्रिंशत्प्रक्रमाअंसपट्युताचतुर्विंशतिप्रक्रमाः॥श्रोणिष्टयुतात्रिंश
त्प्रक्रमाःसंपद्यंते॥तथाचब्राह्मणषट्त्रिंशत्प्रक्रमाः॥प्राचीचतुर्विंति
रग्नेणत्रिंशत्जघनेनेति॥यूपेकादशीनीवेदरशनासोमवेदिवत्साधनंम
ल्वप्रक्रमेविंदाधिक्यमात्॥प्रक्रमायरज्जुदशभीरथास्तैरेकादशैश्चोर ॥२६॥
बुध्नमात्रैःतस्याश्चतुर्विंशतिभागमेयामेकादशिन्यामपिवेदिमाहुरिति॥

भाष्य

प्रमायेत्यादि॥दशास्तप्रमाणंदशयचतुष्टयंवस्तते॥तथाचदशभीरथास्तैश्च
त्वारिंशद्भिस्तैरेकादशैःएकादशभिश्चउपरबुध्नमात्रेउपरोयूपस्यभनिवे
योभागस्तत्प्रमाणंयेतेउभरबुध्नमात्रास्तैरित्यर्थः॥तथाचक्षमाङ्गेनअं
गुलानिप्रमायाष्टाविंशासादिनाष्टांगुलव्यासार्द्धेनषांगुलंबुध्नंभवति॥त
त्रचषोउषएकादशगुणितानिषट्सप्तत्यधिकंशतमंगुलानिभवंति॥ते
षांसप्तहृताअष्टांगुलाधिकाभवंति॥एवंचमिलिताअष्टचत्वारिंशद्भ
स्ताःषोउशांगुलन्यूनाभवंति॥तथाचषोउशांगुलन्यूनाष्टचत्वारिंश
द्भस्तारज्जुप्रमायेत्यर्थः॥तस्यारज्वाःचतुर्विंशतितमोभागश्चतुर्विंशति

शुल्व भागः॥संख्याशब्दानांवृत्तिविषयेपूरणार्थत्वमितिप्रागुक्तं॥सचतुर्विंशतित भाष्य
मोभागः॥किंचादधिकसपादपंचयवोनंतुल्यंहस्वंभवति॥तेनकिंचिदधिक
सपादपंचयवोनहस्तहस्वेनप्रक्रमस्थानीयेनषष्ट्याशंकोपाशंप्रतिमुच्येत्या
दिनाज्योतिष्टोमवेदिसाधनप्रकारेणषट्त्रिंशत्प्रक्रमाःप्राचीचतुर्विंशति
रत्येणत्रिंशत्जघनेनेत्येवंरूपोंयूपैकादशिन्योनीनामकेयागविशेषवेदिमा
रित्यर्थः॥तथाचमूलसूत्रं॥प्रमायरज्जुंदशभिरश्वैरेकादशोश्वोपरबुध्नमात्रे ॥२७॥
जुं तस्याश्चतुर्विंशोभागःप्रक्रमस्थानीयस्तेनरेप्रमायवेदिंविदधातितिशुल्वव्या
ख्यानेनव्याख्यातंस्थूलधीयांसुबोधार्थमेकादशिन्यांप्रक्रममानमात्॥चत्वारिं

शतिरष्टौचअंगुलानिसमासतः॥एकादशिन्यामानेस्मिन्प्रक्रमेकवयोविदुरि
ति॥चत्वारिंशतिपंक्तिंविंशतीत्यादिनाचत्वारिंशदिहेवनिर्देशात्चत्वारिंश
तिरिहहस्तहस्तोगुष्टौचेतिकिंचिदधिकसपादपंचयवोनान्येष्टौवेदितव्या
नि॥अतएवाहसमासतइति॥संक्षेपतःस्थूलगणनयेत्यर्थः॥तेचहिहस्तःप्र
क्रमःस्थूलमानेनवेदितव्यइत्यर्थः॥शेषंसुगमं॥एकादशैश्वोपरबुध्नमात्रेरि
त्युक्तंतत्रबुध्नप्रमाणंसानंचाह॥अंगुलानिप्रमाणेनाष्टौवेद्याग्रादङ्गुलिखेदि
ति॥अष्टावंगुलानिरज्जुंप्रमायतावत्यारज्जावेद्याग्रातूररादशंकोःसकाशा
तूभ्रामणेनअर्द्धंवृत्ताईंभ्रामयेदित्यर्थः॥एवंचषोडशांगुलंबुध्नंभवति॥त

तत्रैष मोऽष्टोयूपो निवेश्य॥ प्रसंगादन्येषां यूपानां निवेशनाय यूपावटप्रकाशः
क्रमश्चलिख्यते॥ तत्राग्निधानयूपादुत्तरदिग्लिर्यक्वितनावेदिरेखोपरिस्था
स्समात्रेस्यकातनोऽष्टांगुलेरकः शंकुं निखेयस्तस्मिन्शंकावष्टांगुलनसूत्रेणमं
डलंभ्रामयेत्तद्द्वितीयंयूपावटं भवति॥ तत्रद्वितीयो निवेश्यः॥ तथाचब्राह्मणां
रस्यासेणविमिमामेयूपोभवति॥ ततोऽग्निष्टानयूपात्दक्षिणतिर्यक्रेखार
थासमात्रमंतरालेत्यकातनोष्टांगुलेशंकुनिखायतत्रशंकावष्टांगुलसूत्रंग्र
हीत्वाभ्रामणेनमंडलमालिखेत्॥ ततस्तृतीयंयूपावटं भवति॥ तत्रतृतीयो ॥ २९ ॥
यूपोनिवेश्यः॥ एवमुत्तरस्यांचार्थेयूपावटंतत्रचतुर्थोयूपः॥ ततोदक्षिणस्या

मेवंपंचयूपावटंतत्रपंचमोयूपोनिवेश्य इति॥ ततउत्तरस्यामेवंषष्ठंतत्रषष्ठो
यूपः॥ ततोदक्षिणस्यामेवंसप्तमंतत्रसप्तमोयूपः॥ ततउत्तरस्यामेवमष्टमं
तत्राष्टमोयूपः॥ ततोदक्षिणस्यांनवमंतत्रनवमोयूपः॥ ततउत्तरस्यामेवंदश
मोयूपः॥ ततोदक्षिणस्यामेवमेकादशंयूपावटेतत्रैकादशोयूप इति॥ एवमेक
दशानांयूपानासईमंतर्वेद्यंबर्हिर्वेदिसन्निवेशः॥ क्रमश्चयुक्तोभवति॥
यथाचमूलसूत्रं॥ अग्निनंगृहीत्वाअग्निघटंदक्षेचरत्यासंपरिमायस्योनयू
पावटंपरिलिखितिव्यत्यासमितरानिति॥ तत्रोत्तरंतद्यदक्षिणःकर्त्तव्यः॥
एवंक्रमोव्यत्यासश्चाब्दार्थः॥ अतःपरंतीव्रसुधागेयथोक्तवेदिसिद्धोविशेष

मात्॥तंप्राचंप्रसमीक्षेतनएतांवेद्यादिखनीमिति॥तंपूर्वोक्तयूपानांसमूहंप्राचंप्र
समीक्षेत॥अग्निधात्प्राचीनरत्नमात्रमंतरालेसत्काअंष्टांगुलेनव्यासाद्वैनमंउ
॥२९॥ लंभ्रामयित्वायूपानिवेश्यएवंप्राचीनंप्राचीनंयावद्देशंवेवंकुर्यादिति॥तथाच
मूलसूत्रं॥तीव्रसुदुघोरपतरष्टष्टःसोमानिपवितोराजापरुच्यमानोयामकामो
भूतिकामःप्रतिष्ठाकामोवायजेतसिद्धमावेदिकाला-यूपवेदिमुदुंतिप्राचीरेका
दशिनींसंमीतो॥मीति॥सोमातिपवीतरतिसोमोअतिक्रम्यपवितोनिगातागुद्
द्वारेणयस्येत्यर्थः॥यावद्यूपामित्यनेनैकरथास्मात्रांतरालेनएकादशंसनिविष्टा
भवतिवेदीकुर्यादित्यर्थः॥एकादशिनामिति॥एकादशानांयूपानां॥समाहारःप्राची



रिति॥प्राचीनामित्यर्थः॥बहुवचनमेकादशानांविशेषणत्वात्चतुर्विंशत्यांप्रक्र
मेधितिं॥वक्ष्यमाणत्वेच॥तथाचकातीयसूत्रं॥तीव्रसुदग्निष्टःप्राचीचेति॥एतां
विद्यादिखंडिनीमिति॥अग्निधादक्षिणतोयूपानामुन्नतत्वादुत्तरतोयूपानांनि
म्नतत्वादेकादशायूपानां॥बर्हिपिछमाराकारतयातदुपलक्षितांवेदिमपिक्षि
खंडिनींजानीयादित्यर्थः॥एवंचयथाकथंचिद्विखंडिनीमितिसंज्ञान्वर्थाः॥इं
द्रवज्रषोडशिनीयागेवेदिमानंयूपस्थानंचतीव्रसुदहेवेत्यतिदिशति॥एतेनै
वतुल्येनइंद्रवज्रषिखंडिनी॥एतेनतीसुदुक्तेनप्रकारेणइंद्रवज्रस्यइंद्रव
ज्रषोडशियागस्यषिखंडिनीषिखंडिनींसंज्ञकांवेदिंजानीयादित्यर्थः॥तथाच

मूलसूत्रं ॥ इंद्रवज्रषोऽग्निनाराजाविजिगीषमानोयजेतेतीव्रसुताव्याख्यातः ॥ सि
मावेदिकालाद्यावद्यूपंवेदिमुदूंहति ॥ प्राचीरेकादशिनीसंमिनोतिरथाभागंहा
दशंसदशंसत्संदक्षिणेति ॥ हादशाधिकायस्मिन्नसत्रेतातद्धादशंतस्मिन्न
धिकमितिदशांतात्ऽइतिऽप्रत्ययः ॥ तयाचहादशाधिकंसत्रमित्यर्थः ॥ शेषं
व्याख्यातं ॥ एकादशसु कर्त्तव्याबुध्नावेदिरसिद्धयेइति ॥ पूर्वमग्निष्टेनिखायरथा
क्षमंतरालेमुक्त्वोत्तरतोदक्षिणतश्चव्यत्यासेनपंचबुध्नावेदिरसिद्धयेकर्त्तव्या
इत्यर्थः ॥ एतत्तंत्रसंगात्पूर्वंव्याख्यातं ॥ ततोनुसंधेयेतीव्रसुदुच्छेइंद्रवज्र ॥ २० ॥
षोऽग्नेनिचअग्निष्टादन्येषांयूपानांप्राचीनतोवेदिरसस्पर्शीभाषवाघुपार्हुसं

नर्वेद्यर्हुबर्हिर्वेदिरनुपपन्नमित्याशंक्यनिराकरोति ॥ संशयोयत्रजायेतो
र्हुयूपावटेयदि ॥ अग्निष्टेनलुतेसर्वेअवरर्हुमवंतितेइति ॥ संशयइति ॥ यत्र
तीव्रसुदुच्छेइंद्रवज्रषोऽग्निचयागेइत्यर्थः ॥ वांसयोजिज्ञासेत्यर्थः ॥ वज्रो
